**Shantipatha**

ॐ आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रम्

अथो बलमिन्द्रियाणी च सर्वाणि।

सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत्

अनिराकरणमस्तु अनिराकरणंमेऽस्तु।

तदात्मनि निरते य उपनिषत्सु धर्माः ते मयि सन्तु ते मयि सन्तु॥

ॐ शान्तिः। शान्तिः। शान्तिः।

om āpyāyantu mamāṅgāni vāk prāṇaścakṣuḥ śrotram

atho balamindriayāṇī ca sarvāṇi |

sarvaṁ brahmaupaniṣadaṁ mā'haṁ brahma nirākuryāṁ mā mā brahma nirākarot

anirākaraṇamastu anirākaraṇaṁme'astu |

tadātmani nirate ya upaniṣatsu dharmāḥ te mayi santu te mayi santu ||

om śāntiḥ| śāntiḥ| śāntiḥ|

**1.01**

केनेषितं पतति प्रेषितं मनः

केन प्राणः प्रथमः प्रैति युक्तः।

केनेषितां वाचमिमां वदन्ति

चक्षुः श्रोत्रं क उ देवो युनक्ति॥ १॥

keneṣitaṁ patati proṣitaṁ manaḥ

kena prāṇaḥ prathamaḥ praiti yuktaḥ ।

keneṣitāṁ vācamimāṁ vadanti

cakṣuḥ śrotraṁ ka u devo yunakti ||1||

1.02

श्रोत्रस्य श्रोत्रं मनसो मनो यद्

वाचो ह वाचं स उ प्रणस्य प्राणः।

चक्षुषश्चक्षुरतिमुच्य धीराः

प्रेत्यास्माल्लोकादमृता भवन्ति॥ २॥

*śrotrasya śrotraṁ manaso mano yad*

*vāco ha vācaṁ sa u praṇasya prāṇaḥ* /

*cakṣuṣaścakṣuratimucya dhīrāḥ*

*pretyāsmāllokādamṛtā bhavanti* //2//

## 1.03

न तत्र चक्षुर् गच्छति   न वाग् गच्छति नो मनः

न विद्मो न विजानीमो  यथैतदनुशिष्यात् ॥ ३ ॥

na tatra cakṣur gacchati   na vāg gacchati no manaḥ

na vidmo na vijānīmo   yathaitadanuśiṣyāt ||3||

## 1.04

अन्यदेव तद् विदितादथो  अविदितादधि

इति शुश्रुम पुर्वेषां  ये नस्तद् व्याचचक्षिरे ॥ ४ ॥

*anyadeva tad viditādatho  aviditādadhi*

*iti śuśruma purveṣāṁ  ye nastad vyācacakṣire* ||4||

1.05

यद् वाचाऽनभ्युदितं येन वागभ्युद्यते

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥५॥

yad vācā'nabhyuditaṁ yena vāgabhyudyate

tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate ||5||

1.06

यन्मनसा न मनुते येनाऽऽहुर् मनो मतम्।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ ६ ॥

yanmanasā na manute yenā''hur mano matam |

tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate ||6||

## 1.07

**यच्चक्षुषा न पश्यति येन चक्षुर्गांषि पश्यति।**

**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥७॥**

yaccakṣuṣā na paśyati yena cakṣugaṁṣi paśyati ।

tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate।।7।।

## 1.08

**यच्छ्रोत्रेण न श्रृणोति येन श्रोत्रमिदं श्रुतम्।**

**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥८॥**

yacchrotreṇa na śrṛṇoti yena śrotramidaṁ śrutam ।

tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate।।8।।

## 1.09

**यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते।**

**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥९॥**

yat prāṇena na prāṇiti yena prāṇaḥ praṇīyate |

tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate||9||

**॥इति प्रथमः खण्डः॥**

||iti prathamaḥ khaṇḍaḥ ||

2.01

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम

यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम्॥ १ ॥

yadi manyase suvedeti dabhramevāpi nūnaṁ tvaṁ vettha brahmaṇo rūpama

yadasya tvaṁ yadasya deveṣvatha nu mīmāṁsyameva te manye viditam ||1||

2.02

नाहं मन्ये सुवेदेति नो न वेदेति वेद च।

यो नस्तद् वेद तद् वेद नो न वेदेति वेद च॥ २ ॥

nāhaṁ manye suvedeti no na vedeti veda ca |

yo nastad veda tad veda no na vedeti veda ca ||2||

## 2.03

**यस्यामतं तस्य मतं मतं यस्य न वेद सः।**

**अविज्ञातं विजानतां विज्ञातमविजानताम्॥ ३॥**

yasyāmataṁ tasya mataṁ mataṁ yasya na veda saḥ |

avijñātaṁ vijānatāṁ vijñātamavijānatām ||3||

## 2.04

**प्रतिबोधविदितं मतम् अमृतत्वं हि विन्दते।**

**आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्॥ ४॥**

pratibodhaviditaṁ matam amṛtatvaṁ hi vindate |

ātmanā vindate vīryaṁ vidyayā vindate'mṛtam ||4||

## 2.05

इह चेदवेदीत् अथ सत्यमस्ति न चेदिहावेदीत् महती विनष्टिः।

भूतेषु भुतेषु विचित्य धीराः प्रेत्यास्माल्लोकाद् अमृता भवन्ति॥५॥

iha cedavedīt atha satyamasti na cedihāvedīt mahatī vinaṣṭiḥ |

bhūteṣu bhuteṣu vicitya dhīrāḥ pretyāsmāllokād amṛtā bhavanti ||5||

3.01

ब्रह्म ह देवेभ्यो विजिग्ये, तस्य ह ब्रह्मणो विजये, देवा अमहीयन्त।

त ऐक्षन्त अस्माकमेवायं विजय अस्माकमेवयां महिमेति॥ १॥

brahma ha devebhyo vijigye tasya ha brahmaṇo vijaye devā amahīyanta ।

ta aikṣanta asmākamevāyaṁ vijaya asmākamevayāṁ mahimeti ।।1।

3.02

तद्धैषां विजज्ञो तेभ्यो ह प्रादुर्बभूव।

तन्न व्यजानत किमिदं यक्षमिति॥ २॥

taddhaiṣāṁ vijajño tebhyo ha prādurbabhūva ।

tanna vyajānata kimidaṁ yakṣamiti ।।2।।

## 3.03

**तेऽग्निमब्रुवन् जातवेद एतद् विजानीहि**

**किमेतद् यक्षमिति तथेति॥ ३॥**

te'gnimabruvan jātaveda etad vijānīhi

kimetad yakṣamiti tatheti ||3||

## 3.04

**तदभ्यद्रवत तभ्यवदत् कोऽसीति।**

**अग्निर्वा अहमस्मीत्यब्रवीत जातवेदा वा अहमस्मीति॥ ४॥**

tadabhyadravata tabhyavadat ko'sīti |

agnirvā ahamasmītyabravīta jātavedā vā ahamasmīti ||4||

## 3.05

तस्मिꣳ सत्वयि किं वीर्यमिति

अपीदꣳ सर्वं दहेयं यदिदं पृथिव्यामिति॥५॥

*tasmigg satvayi kiṁ vīryamiti*

*apīdagm sarvaṁ daheyaṁ yadidaṁ pṛthivyāmiti //5//*

## 3.06

तस्मै तृणं निदधावेतद्दहेति

तदुपप्रेयाय सर्वजवेन

तन्न शशाक दग्धुं स तत एव निववृते

नैतदशकं विज्ञातुं यदेतद्यक्षमिति॥

tasmai tṛṇaṁ nidadhāvetaddaheti

tadupapreyāya sarvajavena

tanna śaśāka dagdhuṁ

sa tata eva nivavṛte

naitadaśakaṁ vijñātuṁ yadetadyakṣamiti ||

3.07

अथ वायुमब्रुवन् वायवेतद्विजानीहि

किमेतद्यक्षमिति तथेति॥

atha vāyumabruvan vāyavetadvijānīhi

kimetadyakṣamiti tatheti||

3.08

तदभ्यद्रवत्तमब्यवदत् कोऽसीति वायुर्वा

अहमस्मीत्यब्रवीद् मातरिश्वा वा अहमस्मीति॥

tadabhyadravattamabyavadat ko'sīti vāyurvā

ahamasmītyabravīd mātariśvā vā ahamasmīti ||

## 3.09

**तस्मिꣳस्त्वयि किं वीर्यमिति**

**अपीदꣳ सर्वमाददीय यदिदं पृथिव्यामिति॥**

tasmiggstvayi kiṁ vīryamiti

apīdagm sarvamādadīya yadidaṁ pṛthivyāmiti ||

## 3.10

तस्मै तृणं निदधावेतदादत्स्वेति

तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं

स तत एव निववृते

नैतदशकं विज्ञातुं यदेतद्यक्षमिति॥

tasmai tṛṇaṁ nidadhāvetadādatsveti

tadupapreyāya sarvajavena tanna śaśākādātuṁ

sa tata eva nivavṛte

naitadaśakaṁ vijñātuṁ yadetadyakṣamiti ||

## 3.11

**अथेन्द्रमब्रुवन् मघवन्नेतद्विजानीहि किमेतद्यक्षमिति**

**तथेति तदभ्यद्रवत्तस्मात्तिरोदधे॥**

athendramabruvan maghavannetadvijānīhi kimetadyakṣamiti

tatheti tadabhyadravat-tasmāt-tirodadhe ||

## 3.12

**स तस्मिन्नेवाकाशे स्त्रियमाजगामबहुशोभमानामुमाꣳ**

**हैमवतीं ताꣳ होवाच किमेतद्यक्षमिति॥**

sa tasminn-evā-kāśe striyam-ājagāma-bahuśobhamāna-umāgm

haimavatīṁ tagm hovāca kimetadyakṣamiti ||

**इति तृतीय खण्डः**

iti tṛtīya khaṇḍaḥ

## 4.01

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये

महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति॥

sā brahmeti hovāca brahmaṇo vā etadvijaye

mahīyadhvamiti tato haiva vidāñcakāra brahmeti ||

## 4.02

तस्माद्वा एते देवा अतितरामिवान्यान्देवान्

यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुः

ते ह्येनत्प्रथमो विदाञ्चकार ब्रहमेति॥

tasmādvā ete devā atitarāmivānyāndevān

yadagnirvāyurindra-te hyenan-nediṣṭhaṁ pasparśuḥ

te hyenat-prathamo vidāñcakāra brahameti ||

4.03

तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान्

स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो

विदाञ्चकार ब्रह्मेति॥

tasmādvā indro'titarāmiva- anyāndevān

sa hyenat - nediṣṭhaṁ pasparśa sa hyeanat-prathamo

vidāñcakāra brahmeti ||

4.04

तस्यैष आदेशो यदेतद्विद्युतो

व्यद्युतदा ३ इतीन्न्यमीमिषदा

३ इत्यधिदैवतम्॥

tasyaiṣa ādeśo yadetadvidyuto

vyadyutadā (3*) itīnnyamīmiṣadā (3)

ityadhidaivatam ||

4.05

अथाध्यात्मंयदेतद् गच्छतीव च मनोऽनेन

चै तदुपस्मरत्यभीक्ष्णꣳ सङ्कल्पः॥

athādhyātmaṁ yadetad gacchatīva ca manah anena

cai tad-upasmarat-abhīkṣṇagm saṅkalpaḥ ||

## 4.06

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं

स य एतदेवं वेदाभिहैनꣳ

सर्वाणि भूतानि संवाञ्छन्ति॥

taddha tadvanaṁ nāma tadvanam-iti-upāsitavyaṁ

sa ya etadevaṁ veda-abhihainagm

sarvāṇi bhūtāni saṁvāñchanti ||

## 4.07

उपनिषदं भो ब्रुहीत्युक्त्वा त उपनिषद्

ब्राह्मीं वाव त उपनिषदमब्रुमेति॥

upaniṣadaṁ bho bruhīti-uktvā ta upaniṣad

brāhmīṁ vāva ta upaniṣadam-abrumeti ||

## 4.08

तस्यै तपो दमः कर्मेति प्रतिष्ठा

वेदाः सर्वाङ्गानि सत्यमायतनम्॥

tasyai tapo damaḥ karmeti pratiṣṭhā

vedāḥ sarvāṅāni satyama-yatanam ||

4.09

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते

स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति॥

yo vā etāmevaṁ vedāpahatya pāpmānam-anante

svarge loke jyeye pratitiṣṭhati pratitiṣṭhati ||

इति चतुर्थ खण्डः

iti caturtha khaṇḍaḥ

इति केनोपनिषत्॥

iti kenopaniṣat||